श्री नारायण स्तोत्रं

श्री नारायण स्तोत्रं

त्रिभुवनभवनाभिरामकोशं सकलकळंकहरं परं प्रकाशं |
अशरणशरणं शरण्यमीशं हरिमजमच्युतमीश्वरं प्रपद्ये || 1 ||

कुवलयदलनीलसंनिकाशं शरदमलांबरकोटरोपमानं |
भ्रमरतिमिरकज्जलांजनाभं सरसिजचक्रगदाधरं प्रपद्ये || 2 ||

विमलमलिकलापकोमलांगं सितजलपंकजकुड्मलाभशंखं
श्रुतिरणितविरंचिचंचरीकं स्वहृदयपद्मदलाश्रयं प्रपद्ये || 3 ||

सितनखगणतारकाविकीर्णं स्मितधवलाननपीवरेंदुबिंबं
हृदयमणिमरीचिजालगंगं हरिशरदंबरमाततं प्रपद्ये || 4 ||

अविरलकृतसृष्टिसर्वलीनं सततमजातमवर्थनं विशालं
गुणशतजरठाभिजातदेहं तरुदलशायिन मर्भकं प्रपद्ये || 5 ||

नवविकसितपद्मरेणुगौरं स्फुटकमलावपुषा विभूषितांगं
दिनशमसमयारुणांगरागं कनकनिभांबरसुंदरं प्रपद्ये || 6 ||

दितिसुतनलिनीतुषारपातं सुरनलिनीसततोदितार्कबिंबं
कमलजनलिनीजलावपूरं हृदि नलिनीनिलयं विभुं प्रपद्ये || 7 ||

त्रिभुवननलिनीसितारविंदं तिमिरसमानविमोहदीपमग्र्यं
स्फुटतरमजडं चिदात्मतत्त्वं जगदखिलार्तिहरं हरिं प्रपद्ये || 8 ||